# उपसर्गार्थचन्द्रिकानुसारम् अनुपूर्वकधातूनाम् अर्थगणनिरूपणम्

**(**Classification of Dhātus Prefixed with Upasarga Anu according to their meaning as Described in Upasargārthacandrikā**)**

**SUKHDEV SHAU (ID-B18903)**

सम्यग्रूपेण प्रयुक्ताः उपसर्गाः वाक्यविन्यासं यथा उपस्कुर्वते न तथेतरत्किञ्चित् इत्ययं विषयः सर्वेषां विदुषां बुद्धिगोचरः अस्त्येव। एतदर्थमेव संस्कृतवाङ्मये सोपसृष्टानां प्रयोगाणां बाहूल्यं दृश्यते। वयमपि अस्माकं नित्यजीवने प्रयुक्तेषु वाक्येषु यथेच्छं सोपसृष्टानि प्रयोगाणि प्रयुञ्महे। एतादृशानां सोपसृष्टानां प्रयोगाणां बाहूल्यं दृष्ट्वैव महामहोपाध्यायाः श्रीमन्तः चारुदेवशास्त्रिणः संस्कृतवाङ्मयस्य अमूल्यरत्नभाण्डागारतुल्येभ्यः संस्कृतग्रन्थसमूहेभ्यः सोपसृष्टान् प्रयोगान् आकलितवान्। आकलय्य तेन पञ्चखण्डात्मकः उपसर्गार्थचन्द्रिकानामकः ग्रन्थः कृतः। अस्मिन्ग्रन्थे उपसर्गयुक्तधातूनाम् अर्थवैचित्रं सुस्पष्टम् अवलोकयितुं शक्यते। तथाहि— उपसर्गेण धात्वर्थो बलादन्यत्र नीयते। प्रहाराहारसंहारविहारपरिहारवत्॥ इति वचनानुसारं धातूनामुपसर्गभेदे सति अर्थपार्थक्यं जायत इति वयं सर्वे जानीमः परन्तु एकस्मादेव उपसर्गात् समानस्यैव धातोः प्रयोगेऽपि अर्थपार्थक्यं सम्भवतीत्यपि दृश्यते। अतः अमुमेव उपसर्गविषयकमर्थभेदमादाय महामहोपाध्यायेन श्रीमता चारुदेवशास्त्रिणा उपसर्गार्थचन्द्रिका इत्याख्यः पञ्चखण्डात्मकः ग्रन्थः कृतः। तत्र उपसर्गाणां योगे सति धातूनाम् अर्थपार्थक्यम् आदाय पूर्विकाः विद्वांसः, कवयः, ग्रन्थकाराश्च कथं स्वस्वकृतौ तेषां व्यवहारं कृतवन्तः इति उदाहरणपुरःसरं उपसर्गार्थचन्द्रिकाग्रन्थे संकलितवान् शास्त्रिवर्यः। अत्र ग्रन्थे क्रमेण प्रादिभिः द्वाविंशत्युपसर्गैः सह पाणिनीयधातुपाठे पठितानां धातूनां योगे सति यद्यद्रूपं लौकिकवैदिकप्रयोगे च दृश्यते, तेषां प्रयोगानां संकलनं कृत्वा प्रत्येकं प्रयोगस्य कः अर्थः इति प्रतिपादितं ग्रन्थकर्त्रा। धातूपसर्गयोश्च समानतायां कथम् अर्थपार्थक्यं सम्भवतीत्यस्य एकं निदर्शनं दीयते। तथाहि— "**अन्वीक्षमाणो रामस्तु विषण्णं भ्रान्तचेतसम्। राजानं मातरं चैव ददर्शानुगतौ पथि॥** "(रा०-२.४०.३९) इति प्रथमम् उदाहरणम्, "**अन्वीक्षणमनु श्रेयो ह्यस्य विचिन्तयन्**"।(रा०- ७.३.४) इति द्वितीयम् उदाहरणम्। अत्र प्रदत्ते उदाहरणद्वये अनु-उपसर्गपूर्वकाद् ईक्ष्-धातोः प्रयोगो विद्यते। परन्तु तयोः प्रथमोदाहरणे अन्वीक्षमाण इति पदस्य 'पृष्ठतोऽवलोकयमानः' किञ्च द्वितीयोदाहरणे अन्वीक्षणम् इत्यस्य 'शुभाशुभवीक्षणम्' इति अर्थपार्थक्यं दृश्यते। अत्र धातुरपि समानः उपसर्गोऽपि समानः तथापि

अर्थपार्थक्यमस्ति। संस्कृतवाङ्मये एतादृशानां सोपसृष्टप्रयोगानां संकलनं विद्यते उपसर्गार्थचन्द्रिकायाम्। किञ्च तेषु तेषु प्रयोगेषु सोपसृष्टधातोः अर्थोऽपि शास्त्रिमहाभागेन निर्धारितः।

मम शोधप्रबन्धस्य शीर्षकं विद्यते—"उपसर्गार्थचन्द्रिकानुसारम् अनुपूर्वकधातूनाम् अर्थगणनिरूपणम्" इति। प्रकृते शोधकार्ये अहं पञ्चखण्डात्मकस्य उपसर्गार्थचन्द्रिकाग्रन्थस्य द्वितीयभागे स्थितं अनु इत्येकम् उपसर्गमादाय शोधं साधितवान्। ग्रन्थेऽस्मिन् अनु इत्येकस्य उपसर्गस्यैव प्रायः ११३६ उदाहरणानि विद्यन्ते। उदाहरणानाम् एतावदाधिक्यं दृष्ट्वा अहं मम शोधप्रबन्धं सप्तसु विभागेषु विभक्तवान्। उपोद्घातभागम् उपसंहारभागं च विहाय आहत्य अस्मिन् प्रबन्धे चत्वारः अध्यायः वर्तन्ते अन्ते च परिशिष्टभागः विद्यते। उपोद्घाते तावत् उपसर्गार्थचन्द्रिका इति ग्रन्थस्य परिचयः, ग्रन्थकारस्य परिचयः, प्रकृतस्य शोधकार्यस्य स्वरूपम्, शोधस्य अस्य प्रयोजनं, शोधपद्धतिश्च इत्येते विषयाः निरूपिताः वर्तन्ते। ततः प्रथमाध्यायतः चतुर्थाध्यायं यावत् मूलविषयः अर्थात् सोपसृष्टप्रयोगाणाम् अर्थनिरूपणं प्रदर्शितम्। तत्रापि यथा उपसर्गार्थचन्द्रिकायाम् अकारादिक्रमेण धातूनाम् उदाहरणानि संकलितानि सन्ति तथैव अहम् अपि अकारादिक्रमेण धातूनादाय अध्यायानां विभाजनं कृतवान्। तेषु प्रथमे अध्याये अजादि-धातूनां विषये चर्चा संञ्जाता। तथाहि अकारादिम् 'अञ्चु गतिपूजनयोः' इति धातुम् आरभ्य 'एषृ गतौ' इति धातुपर्यन्तं वर्णनं विद्यते अस्मिन् प्रथमे अध्याये। द्वितीये अध्याये ककारादिमं 'कथ वाक्यप्रकथने' इति धातुम् आरभ्य मकारादिं 'मृश आमर्शने' इति धातुं यावत् वर्णनं विद्यते। तृतीये अध्याये यकारादिम् 'यज देवपूजासंगतिकरणदानेषु' इति धातुम् आरभ्य हकारादिम् 'ह्वेञ् स्पर्धायां शब्दे च' इति धातुं यावद् प्रयोगाणां वर्णनं विद्यते। चतुर्थे अध्याये तु तेषां प्रयोगाणां चर्चा विहिता येषु अनु इत्युपसर्गेण सह अपरस्यापि उपसर्गस्य योगः विद्यते। तथाहि अस्मिन् अध्याये अनु + अप इत्युपसर्गद्वययुक्तं 'क्रमु पादविक्षेपे' इति धातुम् आरभ्य अनु + सम् + प्र इत्युपसर्गत्रययुक्तम् 'आप्लृ व्याप्तौ' इति धातुं यावत् चर्चा विद्यते। ततः उपसंहारभागः अस्ति यस्मिन् पूर्वेषाम् अध्यायानां सारांशः उपन्यस्तः वर्तते। ततः परिशिष्टभागः द्विधा विभक्तः। प्रथमे परिशिष्टे परिशीलितग्रन्थसूची विद्यते। द्वितीये च परिशिष्टे अनूपसृष्टधातूनाम् अर्थगणम् आदाय निर्मितः तथ्यभाण्डागारः वर्तते।